# श्रीराधिकायाः प्रेमपूराभिधस्तोत्रम्

मधुमधुरनिशायां ज्योतिरुद्भासितायां
सितकुसुमसुवासाः वःक्षतकर्पूरभूषा ।
सुबलसखमुपेता दूतिकान्यस्तहस्ता
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥१ ॥

स्मरगृहमविशन्ती वाम्यतो धाम गन्तुं
सरणिमनुसरन्ती तेन संरुद्धय तूर्णम् ।
बलसवलितकाक्वा लम्भितान्तःस्मिताक्षी
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥२ ॥

मुदिररुचिरवक्षस्युन्नते माधवस्य
स्थिरचरवरविद्युद्वल्लिवन्मल्लितल्पे ।
ललितकनकयूथीमालिकावच्च भान्ती
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥ ३ ॥

स्मरविलसिततल्पे जल्पलीलामनल्पां
क्रमकृतिपरिहीनां बिभ्रती तेन सार्धम् ।
मिथ इव परिरम्भारम्भवृत्त्येकवर्ष्मा
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥४ ॥

प्रमदमदनयुद्धश्रान्तितः कान्तकृष्ण-
प्रचुरसुखदवक्षःस्फारतल्पे स्वपन्ती ।
रसमुदितविशाखाजीविताब्धौ समृद्धा
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥५ ॥

अपि बत सुरतान्ते प्रौढिसौभाग्यदृप्यत्-
प्रणयधृतसुसख्योन्मादमत्तोरुगर्वैः ।
दरगदितमुकुन्दाकल्पिताकल्पतल्पा
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥६ ॥

स्मरदयितनिकुञ्जप्राङ्गणे व्यावहास्यां
व्रजनवयुवराजं वक्रिमाडम्बरेण ।
सदसि परिभवन्ती संस्तुतालीकुलेन
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥७ ॥

क्वचन च दरदोषाद्दैवतः कृष्णजातात्
सपदि विहितमाना मौनिनी तत्र तेन ।
प्रकटितपटुचाटुप्रार्थ्यमानप्रसादा
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥ ८ ॥

पितुरिह वृसभानोर्भाग्यभङ्गी बकारेः
प्रणयविपिनभृङ्गी सङ्गिनी तस्य देवी ।
निजगणकुमुदालेः कौमुदी हा कृपाब्धे

क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥९ ॥

निरवधिगुणसिन्धो भद्रसेनादिबन्धो
निरुपमगुणवृन्दप्रेयसीवृन्दमौले ।
अतिकदनसमुद्रे मज्जतो हा कृपार्द्रे
क्षणमपि मम राधे नेत्रमानन्दय त्वम् ॥१० ॥

नटयति रुचिनान्दीमुन्नयन्सूत्रधार-
प्रवर इव रसज्ञानर्तकीं रङ्गरूपे ।
रसवति दशकेऽस्मिन्प्रेमपूराभिधे यः
स सपदि लभते तत्द्वन्द्वरत्नप्रसादम् ॥११ ॥

इति श्रीमद्रघुनाथदासगोस्वामिविरचितस्तवावल्यां श्रीराधिकायाः प्रेमपूराभिधस्तोत्रम्सम्पूर्णम् ।